चूर्णक-र्णिका, चूर्णयिता-त्री, इत्यादिकानि रूपाणि भ्रमणार्थक—(474) भौवादिकचूर्णधातोर्ण्यन्तरूपाणीव बोध्यानि। ल्युटि[A]-चूर्णनम्। ण्यन्तात् सनि तु इमानि रूपाणीति विशेषः।

चुचूर्णयिषकः-षिका, चुचूर्णयिषिता-त्री, चुचूर्णयिषन्-न्ती;
चुचूर्णयिषिष्यन्-न्ती-ती, चुचूर्णयिषमाणः, चुचूर्णयिषिष्यमाणः;
चुचूर्णयिट्-चुचूर्णयिषौ-चुचूर्णयिषः, चुचूर्णयिषितः-तवान्;
चुचूर्णयिषुः, चुचूर्णयिषितव्यम्, चुचूर्णयिषणीयम्, चुचूर्णयिष्यम्;
ईषच्चुचूर्णयिषः-दुश्चुचूर्णयिषः-सुचुचूर्णयिषः;
चुचूर्णयिष्यमाणः, चुचूर्णयिषः, चुचूर्णयिषितुम्, चुचूर्णयिषा;
चुचूर्णयिषणम्, चुचूर्णयिषित्वा, प्रचुचूर्णयिष्य, चुचूर्णयिषम् २; चुचूर्णयिषित्वा २.

(551) "चूर्ण सङ्कोचने" (X-चुरादिः-1642. सक. सेट्. उभ)

'चूण सङ्कोचने' इति क्षीरस्वामी पपाठ।

चूर्णकः-र्णिका, चुचूर्णयिषकः-षिका; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक-चूर्णयतिवत् (550) बोद्धयानि। स्त्रियाम्-चूर्णना[B]।

(552) "चूष पाने" (I-भ्वादिः-673. सक. सेट् पर.)

चूषकः-षिका, चूषकः-षिका, चुचूषिषकः-षिका, चोचूषकः-षिका;
चूषिता-त्री, चूषयिता-त्री, चुचूषिषिता-त्री, चोचूषिता-त्री;
चूषन्-न्ती, चूषयन्-न्ती, चुचूषिषन्-न्ती; —
चूषिष्यन्-न्ती-ती, चूषयिष्यन्-न्ती-ती, चुचूषिषिष्यन्-न्ती-ती;
— चूषयमाणः, चूषयिष्यमाणः, — चोचूष्यमाणः, चोचूषिष्यमाणः;
[1]चूट्-चूड्-चूषौ-चूषः; — — —

1. 'झलां जशोऽन्ते' (8-2-39) इति जश्त्वेन डकारः।
A. 'संपश्य तन्निजदशैवमवर्णि लोकैरेषोऽजनिष्ट किल दुग्धविचूर्णनार्थम्।' धा. का. 3. 15.
B. 'सौधे विटङ्कजुषि पश्यति भूसितोऽयं राजारिकीटबलचूर्णनयाऽतिपूज्यः।' धा. का. 3. 27.